শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীশঙ্করাচার্য ৱিরচিতম্

# ॥ শ্রীরামভুজঙ্গপ্রযাতস্তোত্রম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীরামভুজঙ্গপ্রযাতস্তোত্রম্ ॥

ৱিশুদ্ধং পরং সচ্চিদানন্দরূপং
গুণাধারমাধারহীনং ৱরেণ্যম্।
মহান্তং ৱিভান্তং গুহান্তং গুণান্তং
সুখান্তং স্ৱযং ধাম রামং প্রপদ্যে॥ **1** ॥

শিৱং নিত্যমেকং ৱিভুং তারকাখ্যং
সুখাকারমাকারশূন্যং সুমান্যম্।
মহেশং কলেশং সুরেশং পরেশং
নরেশং নিরীশং মহীশং প্রপদ্যে॥ **2** ॥

যদাঽৱর্ণযৎকর্ণমূলেঽন্তকালে
শিৱো রাম রামেতি রামেতি কাশ্যাম্।
তদেকং পরং তারকব্রহ্মরূপং
ভজেঽহং ভজেঽহং ভজেঽহং ভজেঽহম্॥ **3** ॥

মহারত্নপীঠে শুভে কল্পমূলে
সুখাসীনমাদিত্যকোটিপ্রকাশম্।
সদা জানকীলক্ষ্মণোপেতমেকং
সদা রামচন্দ্রং ভজেঽহং ভজেঽহম্॥ **4** ॥

ক্ৱণদ্রত্নমঞ্জীরপাদারৱিন্দং
লসন্মেখলাচারুপীতাম্বরাঢ্যম্।
মহারত্নহারোল্লসৎকৌস্তুভাঙ্গং
নদচ্চঞ্চরীমঞ্জরীলোলমালম্॥ **5** ॥

লসচ্চন্দ্রিকাস্মেরশোণাধরাভং
  সমুদ্যৎপতঙ্গেন্দুকোটিপ্রকাশম্।
নমদ্ব্রহ্মরুদ্রাদিকোটীররত্ন
  স্ফুরৎকান্তিনীরাজনারাধিতাঙ্ঘ্রিম্॥ **6** ॥

পুরঃ প্রাঞ্জলীনাঞ্জনেযাদিভক্তান্
  স্বচিন্মুদ্রযা ভদ্রযা বোধযন্তম্।
ভজেঽহং ভজেঽহং সদা রামচন্দ্রং
  ৎৱদন্যং ন মন্যে ন মন্যে ন মন্যে॥ **7** ॥

যদা মৎসমীপং কৃতান্তঃ সমেত্য
  প্রচণ্ডপ্রকোপৈর্ভটৈর্ভীষযেন্মাম্।
তদাঽৱিষ্করোষি ৎৱদীযং স্বরূপং
  সদাপৎপ্রণাশং সকোদণ্ডবাণম্॥ **8** ॥

নিজে মানসে মন্দিরে সন্নিধেহি
  প্রসীদ প্রসীদ প্রভো রামচন্দ্র।
সসৌমিত্রিণা কৈকযীনন্দনেন
  স্বশক্ত্যানুভক্ত্যা চ সংসেৱ্যমান॥ **9** ॥

স্বভক্তাগ্রগণ্যৈঃ কপীশৈর্মহীশৈঃ
  অনীকৈরনেকৈশ্চ রাম প্রসীদ।
নমস্তে নমোঽস্ত্বীশ রাম প্রসীদ
  প্রশাধি প্রশাধি প্রকাশং প্রভো মাম্॥ **10** ॥

ৎৱমেৱাসি দেৱং পরং মে যদেকং
  সুচৈতন্যমেতত্ত্বদন্যং ন মন্যে।
যতোঽভূদমেযং ৱিযদ্বাযুতেজো
  জলোর্ৱ্যাদিকার্যং চরং চাচরং চ॥ **11** ॥

নমঃ সচ্চিদানন্দরূপায তস্মৈ
নমো দেৱদেৱায রামায তুভ্যম্।
নমো জানকীজীৱিতেশায তুভ্যং
নমঃ পুণ্ডরীকাযতাক্ষায তুভ্যম্॥ **12**॥

নমো ভক্তিযুক্তানুরক্তায তুভ্যং
নমঃ পুণ্যপুঞ্জৈকলভ্যায তুভ্যম্।
নমো ৱেদৱেদ্যায চাদ্যায পুংসে
নমঃ সুন্দরাযেন্দিরাৱল্লভায॥ **13**॥

নমো ৱিশ্ৱকর্ত্রে নমো ৱিশ্ৱহর্ত্রে
নমো ৱিশ্ৱভোক্ত্রে নমো ৱিশ্ৱমাত্রে।
নমো ৱিশ্ৱনেত্রে নমো ৱিশ্ৱজেত্রে
নমো ৱিশ্ৱপিত্রে নমো ৱিশ্ৱমাত্রে॥ **14**॥

নমস্তে নমস্তে সমস্তপ্রপঞ্চ
প্রভোগপ্রযোগপ্রমাণপ্রৱীণ।
মদীযং মনস্ত্ৱৎপদদ্ৱন্দ্ৱসেৱাং
ৱিধাতুং প্রৱৃত্তং সুচৈতন্যসিদ্ধ্যৈ॥ **15**॥

শিলাপি ৎৱদঙ্ঘ্রিক্ষমাসঙ্গিরেণু
প্রসাদাদ্ধি চৈতন্যমাধত্ত রাম।
নরস্ত্ৱৎপদদ্ৱন্দ্ৱসেৱাৱিধানাৎ
সুচৈতন্যমেতীতি কিং চিত্রমত্র॥ **16**॥

পৱিত্রং চরিত্রং ৱিচিত্রং ৎৱদীযং
নরা যে স্মরন্ত্যন্ৱহং রামচন্দ্র।
ভৱন্তং ভৱান্তং ভরন্তং ভজন্তো
লভন্তে কৃতান্তং ন পশ্যন্ত্যতোঽন্তে॥ **17**॥

স পুণ্যঃ স গণ্যঃ শরণ্যো মমাযং
নরো ৱেদ যো দেৱচূডামণিং ৎৱাম্।
সদাকারমেকং চিদানন্দরূপং
মনোৱাগগম্যং পরং ধাম রাম॥ **18** ॥

প্রচণ্ডপ্রতাপপ্রভাৱাভিভূত
প্রভূতারিৱীর প্রভো রামচন্দ্র।
বলং তে কথং ৱর্ণ্যতেঽতীৱ বাল্যে
যতোঽখণ্ডি চণ্ডীশকোদণ্ডদণ্ডম্॥ **19** ॥

দশগ্রীৱমুগ্রং সপুত্রং সমিত্রং
সরিদ্দুর্গমধ্যস্থরক্ষোগণেশম্।
ভৱন্তং ৱিনা রাম ৱীরো নরো ৱা -
ঽসুরো ৱাঽমরো ৱা জযেৎকস্ত্রিলোক্যাম্॥ **20** ॥

সদা রাম রামেতি রামামৃতং তে
সদারামমানন্দনিষ্যন্দকন্দম্।
পিবন্তং নমন্তং সুদন্তং হসন্তং
হনূমন্তমন্তর্ভজে তং নিতান্তম্॥ **21** ॥

সদা রাম রামেতি রামামৃতং তে
সদারামমানন্দনিষ্যন্দকন্দম্।
পিবন্নন্ৱহং নন্ৱহং নৈৱ মৃত্যোঃ
বিভেমি প্রসাদাদসাদাত্তৱৈৱ॥ **22** ॥

অসীতাসমেতৈরকোদণ্ডভূষৈঃ
অসৌমিত্রিৱন্দ্যৈরচণ্ডপ্রতাপৈঃ।
অলঙ্কেশকালৈরসুগ্রীৱমিত্রৈঃ
অরামাভিধেযৈরলং দৈৱতৈর্নঃ॥ **23** ॥

অৱীরাসনস্থৈরচিন্মুদ্রিকাঢ্যৈঃ
অভক্তাঞ্জনেযাদিতত্ত্বপ্রকাশৈঃ।
অমন্দারমূলৈরমন্দারমালৈঃ
অরামাভিধেযৈরলং দৈৱতৈর্নঃ ॥ **24** ॥

অসিন্ধুপ্রকোপৈরৱন্দ্যপ্রতাপৈঃ
অবন্ধুপ্রযাণৈরমন্দস্মিতাঢ্যৈঃ।
অদণ্ডপ্রৱাসৈরখণ্ডপ্রবোধৈঃ
অরামাভিধেযৈরলং দেৱতৈর্নঃ ॥ **25** ॥

হরে রাম সীতাপতে রাৱণারে
খরারে মুরারেঽসুরারে পরেতি।
লপন্তং নযন্তং সদাকালমেৱং
সমালোকযালোকযা শেষবন্ধো ॥ **26** ॥

নমস্তে সুমিত্রাসুপুত্রাভিৱন্দ্য নমস্তে সদা কৈকযীনন্দনেড্য।
নমস্তে সদা ৱানরাধীশৱন্দ্য নমস্তে নমস্তে সদা রামচন্দ্র ॥ **27** ॥

প্রসীদ প্রসীদ প্রচণ্ডপ্রতাপ
প্রসীদ প্রসীদ প্রচণ্ডারিকাল।
প্রসীদ প্রসীদ প্রপন্নানুকম্পিন্
প্রসীদ প্রসীদ প্রভো রামচন্দ্র ॥ **28** ॥

ভুজঙ্গপ্রযাতং পরং ৱেদসারং
মুদা রামচন্দ্রস্য ভক্ত্যা চ নিত্যম্।
পঠন্ সন্ততং চিন্তযন্ স্বান্তরঙ্গে
স এৱ স্বযং রামচন্দ্রঃ স ধন্যঃ ॥ **29** ॥

॥ ইতি শ্রীরামভুজঙ্গপ্রযাতস্তোত্রং সমাপ্তম্ ॥